# Shivagaurisamvade Upanishallingakathanam

# શિવગૌરીસંવાદે ઉપનિષલ્લિઙ્ગકથનમ્

## Document Information

Text title : Shivagaurisamvade Upanishadlingakathanam

File name : upaniShallingakathanam.itx

Category : shiva, shivarahasya, upanishhat, upaniShat

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 59 - shivagaurIsaMvAde upaniShalliNgakathanam | vAvRittashlokAH ||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# શિવગૌરીસંવાદે ઉપનિષલ્લિઙ્ગકથનમ્

ઈશ્વરઃ -

અહમીશશ્ચ જીવોઽહમિત્યહઙ્કારમાનિનૌ ।
તાવેવ હરિબ્રહ્માણૌ તલિઙ્ગાદર્શકૌ શિવે ॥ ૧॥

તન્મૌલિમૂલં ચ સુરૌ સોઽહઙ્કારઃ પ્રકીર્તિતઃ ।
અહં માનાભિપન્નાનાં નાસ્તિ તત્પૂજનં શિવે ॥ ૨॥

ઈશોઽહં બ્રહ્મ પરમં વાચ્યવાચકવર્જિતમ્ ।
ધ્યાયન્ સ્વાત્મૈક્યવિજ્ઞાનમહાનન્દામ્બુમગ્નધીઃ ॥ ૨૨॥

સદાશિવોઽહમસ્મીતિ તન્નિર્નોદકપાનકૃત્ ।
એવમાત્મમહાલિઙ્ગપૂજા તે કથિતા શિવે ॥ ૩૪॥

એવં પૂજયતો નિત્યં પૂજ્યપૂજાવિવર્જિતઃ ।
પૂજકઃ પૂજ્યતામેતિ સદાલિઙ્ગમયોભવેત્ ॥ ૩૫॥

ન પૂજાનલિઙ્ગં ન ચોપાસનાદિ ન વેદાન્તધારારસાસ્વાદનં હિ ।
ન વેદપ્રચારોત્થમૈધકજાલેસ્શિવેમત્પ્રસાદૈકલભ્યં કિલેદમ્ ॥ ૩૬॥

ન ચ પ્રાણકોશં ન ચાનન્દકોશં ન વિજ્ઞાનકોશં ન ચાન્નાદિકોશમ્ ।
ન ચાણુર્ન દીર્ઘં ન બધ્દં ન મુક્તં ન ચ દ્વૈતમેકં ત્વનીશં પરં ચ ॥ ૩૭॥

(ન ચાણુર્ન દીર્ઘં ન બધ્દં ન મુક્તં ન ચ દ્વૈતમેકં સદેશં મહેશં) ॥ ૩૭॥

ન ચ વ્યાપકં દેશકાલાદિહીનમવસ્થાદિહીનં ત્વલિઙ્ગં રસાદિ (ગુણદિ) ।
ગુણાતીતમેકં ચિદાનન્દરૂપં ઘનં ચાપ્યખણ્ડં સદાખણ્ડિતેષુ ॥ ૩૮॥

મનોવાગતીતં ત્વનાદિં ચ સૂક્ષ્મં સદા શુદ્ધબુદ્ધં ત્વસઙ્ગં મહાઙ્ગમ્ ।
સદા લિઙ્ગસઙ્ગં ત્વલિઙ્ગં સુતુઙ્ગં નભસ્સ્વાન્તરઙ્ગં જનાનામસઙ્ગમ્ ॥ ૩૯॥

ન પુણ્યં ન પાપં ન તજ્જન્મનાશે ન ચિન્તા નચાર્તિર્ન તલ્લોભમોહૌ ।
ન વા દેશિકો નૈવ શિષ્યસ્તદેવં ન વેદાન્તવાદૈર્દુરાપં સદાપમ્ ॥ ૪૦॥

સહસ્રાસ્યહસ્તં સહસ્રોરુપાદં તદેવાધુના પાણિપાદાસ્યહીનમ્ ।
તથાગન્ધમેકં રસૈશ્ચાપિ હીન મસંસ્પર્શકં ઘ્રાણજિહ્વાદિહીનમ્ ॥ ૪૧॥

તુરીયં ત્વશીર્ણં શરીરેષુ નિત્યં વિભુ સર્વદેહાદિધર્મૈર્વિહીનમ્ ।
તથાત્માનમિષ્ટં કનિષ્ટં ચ જ્યેષ્ટં પ્રિયં વસ્તુતસ્સર્વભાગેષુ યુક્તમ્ ॥ ૪૨॥

તદેવાખિલૈર્ભોગજાલૈર્વિહીનં મહાનન્દસન્દોહધામૈકસીમ ।
તદેવાસ્મિ લિઙ્ગં તદેવાસ્મિ ભૂતં તદેતદ્ભવિષ્યં શિવે વર્તમાનમ્ ॥ ૪૩॥

તદેવાખિલાધારપુચ્છં પ્રતિષ્ઠં તદેવાદ્ય બ્રહ્મ તદેવ ત્વમીશે ।
તદેવેશિ તત્વં સદા તત્વમસ્મીત્યહંબ્રહ્મચાસ્મીતિ વાક્યૈર્દુરાપમ્ ॥ ૪૪॥

તદેવાયમાત્મેતિ બ્રહ્મેત્યહં વૈ સદા બ્રહ્મભૂતો ભવેદેવ બ્રહ્મ ।
તદૂર્ધ્વં હ્યધસ્થાત્તદેવેતિ દેવિ તદેવેશિ પશ્ચાત્પુરસ્તાત્તદેવ ॥ ૪૫॥

તદેવાદ્ય લોકાસ્તથાલોકલોક્યા દિશો ભૂતવર્ગં તથા વેદજાલમ્ ।
સુરાશ્ચાસુરા ભૂસુરાભામુરં તત્પ્રવિષ્ટં સમસ્તેષુ નિષ્ટં વિશિષ્ટમ્ ॥ ૪૬॥

કનિષ્ટં વિશિષ્ટૈશ્ચ શિષ્ટૈર્દુરાપં સદા લોકનેત્રે શિવૌ ચાપિવિષ્ટમ્ ।
તદીયપ્રસાદેન વાયુર્દ્ધરિત્રી તથા સૂર્યચન્દ્રાદયો વહ્નયશ્ચ ॥ ૪૭॥

વિભાત્યસ્ય ભાસૈવ લોકં ત્વશેષં યદજ્ઞાનતો નિત્યમેતજ્જડં ચ ।
યદુદ્બોધનેનાપિ સર્વં વિભાતિ યદાલોકને સર્વમેતદ્વિપશ્યેત્ ॥ ૪૮॥

દૃગેતદૃશૌ નૈવ રૂપં તદેતન્ન દૃશ્યં તથાદર્શનં ચાપિ ગૌરિ ।
ન તદ્જ્ઞાનમજ્ઞાનમેતદ્વિચિત્રં ન સૂક્ષ્મં ન ચ સ્થૂલમણ્વાદિહીનમ્ ॥ ૪૯॥

ન તત્કિઞ્ચ કેનાપિ પશ્યઞ્ચ જિઘ્રં ન ચ સ્પર્શગન્ધાદિશબ્દાદિહીનમ્ ।
તદેતત્સુરાણાં હૃદિસ્થં ગુહાસ્થં ન હિ પ્રાણવાચાં મનસ્તોઽપિ દૂરમ્ ॥ ૫૦॥

ન ચ સ્ત્રી ન પુંશ્ચ ન હિ ક્લીબમેતદ્યદા કેન કાર્યેણ યુક્તં હિ તદ્ધિ ।
ન બાલં યુવા વૈ ન વૃદ્ધં ન દીર્ઘં ન ચ હ્રસ્વદીર્ઘં ન કૃષ્ણં ન પીતમ્ ॥ ૫૧॥

ન વૈ વર્તુલં નૈવ તદ્વૈ ચતુષ્કં નચોર્ધ્વં ન ચાધો ન તદ્વિસ્તરં હિ ।
તદેવાદ્યખણ્ડં ન ખણ્ડાદિહીનં સમસ્તાણ્ડગં વિસ્તૃતં ચાણ્ડતોઽપિ ॥ ૫૨॥

ન શુષ્કં ન ચાર્દ્રં ઘનં વાપિ દેવિ ન કિઞ્ચિત્તદેવેહ પશ્યામિ લિઙ્ગમ્ ।
યતો બ્રહ્મવિષ્ણ્વિન્દ્રરુદ્રાઃ પ્રજાતા યતો વા મહાભૂતસઙ્ઘાનિ દેવિ ॥ ૫૩॥

અનેનૈવ જીવન્તિ નિત્યં સદાસ્તે જગજ્જાલમેતન્મહાલોકવર્ગૈઃ ।
તથાન્તે લયં યાતિ લિઙ્ગ ત્વલિઙ્ગે તદેતદ્વિજિજ્ઞાસસ્વ બ્રહ્મત્વમેવ ॥ ૫૪॥

યેનૈવ સર્વેન્દ્રિયકલ્પના તતા રૂપઞ્ચ ચક્ષુઃ પરિપશ્યતે તત્ ।
તદેવ લિઙ્ગં વિમલં પ્રપશ્ય નાનૈવ નાસ્તિ પરિદૃશ્યતે તત્ ॥ ૫૫॥

યદૈવ વાક્સર્વરસાંશ્ચ વેત્તિ રસાતિગં તત્પરિપશ્યલિઙ્ગમ્ ।
તદેવ તચ્છ્રોત્રવરં ચ દિવ્યં શ્રાવ્યં શ‍ૃણોતીદમેવાદ્ય લિઙ્ગમ્ ॥ ૫૬॥

યદેવ ચાઘ્રાતિ સુગન્ધમેતત્તદેવ લિઙ્ગં પરિપશ્ય દેવિ ।
યત્રૈવ ત્વક્સ્પર્શમથૈવ વેત્તિ તદેવ લિઙ્ગં મમ દેવિ પશ્ય ॥ ૫૭॥

યદેવ (યનૈવ) ચ પ્રાણિતિ પ્રાણિવર્ગં બુદ્ધ્યાદિ યદ્બોધયતેઽદ્ય લિઙ્ગમ્ ।
પાણ્યઙ્ઘ્રિપાયુપ્રજનાદિકેષુ વિસર્ગજાનન્દચલં ચ ધર્મમ્ ॥ ૫૮॥

તલ્લિઙ્ગમેતદ્ધિ વિજાનતે જના મનો મનો યચ્ચ તદેવ લિઙ્ગમ્ ।
યથૈવ નદ્યસ્સરમાણાસ્સમુદ્રં વેલાતિગા નામરૂપે વિહાય ॥ ૫૯॥

તલ્લિઙ્ગસન્દર્શનતો નરો ભવેન્નામાતિગો રૂપગુણાતિગશ્ચ ।
તદેવ લિઙ્ગં ધ્વનિબિન્દુવર્ણં માત્રાકલાતીતગુણાતિગઞ્ચ ॥ ૬૦॥

ઓમોમિતિ પ્રાણવર્ગે ચ વેદે વેદાન્તસઙ્ગે ચ વદત્યભીક્ષ્ણમ્ ।
ઈશાનવાસ્યં હિ તદેવ લિઙ્ગં પૂર્ણાત્તથા પૂર્ણતરં સુપૂર્ણમ્ ॥ ૬૧॥

યદા તમસ્તન્ન દિવા ન રાત્રિર્ન સન્ન ચાસત્સદતીતલિઙ્ગમ્ ।
તદક્ષરં તત્સવિતુર્વરેણ્યં પ્રજ્ઞા ચ તસ્માત્પ્રસૃતા પુરાણી ॥ ૬૨॥

ભાવગ્રાહ્યગનીડં તદ્ભાવાભાવકરં હિ તત્ ।
કલાસર્ગગતં લિઙ્ગં યે વિદુસ્તે જહુસ્તનુમ્ ॥ ૬૩॥

સ્વભાવમેકે વદન્તીશલિઙ્ગં કાલં તથાન્યે પરિમુહ્યમાનાઃ ।
લિઙ્ગસ્યૈતન્મહિમાનમિતિ વીતશોકો જ્ઞાત્વા લિઙ્ગં શાન્તિમત્યન્તમેતિ ॥ ૬૪॥

યસ્મિન્લિઙ્ગે અધિવિશ્વે નિષેદુર્યસ્મિન્નિદં સઞ્ચવિચૈતિ વિશ્વમ્ ।
યસ્માદ્બભૂવ ભુવનસ્યાસ્ય ગોપાઃ પ્રજાપતિર્ભૂતવર્ગૈકકર્તા ॥ ૬૫॥

યલિઙ્ગમેતદ્ભવનં વિચક્રમે તસ્યાંશતઃ પાદમિદં હિ વિશ્વમ્ ।
અણોરણીયાન્મહતો મહીયાંસ્તદેવ લિઙ્ગં નિહિતં ગુહાયામ્ ॥ ૬૬॥

ન પ્રજ્ઞૈવ ચ તલ્લિઙ્ગં નાપ્રજ્ઞં ચૈતદીશ્વરિ ।
અદૃશ્યં ચૈવ તલ્લિઙ્ગમગ્રાહ્યં તત્સદૈવ હિ ॥ ૭૮॥

એકાત્મપ્રત્યયં લિઙ્ગં પ્રપઞ્ચોપશમં હિ તત્ ।

તલ્લિઙ્ગજ્ઞા ઇમે લોકાસ્તલ્લિઙ્ગે લીયતેઽખિલમ્ ॥ ૭૯॥

તલ્લિઙ્ગે લયનાદ્દેવિ તજ્જલાનીતિ તે જગુઃ ।
તદ્વેદાદૌ સ્વરં લિઙ્ગં વેદાન્તે ચ પ્રતિષ્ઠિતમ્ ॥ ૮૦॥

તલ્લિઙ્ગપ્રકૃતૌલીનાબ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
તદ્બ્રહ્મતચ્છિવસ્સાક્ષાત્તદ્વિષ્ણુસ્તદ્વિરાટ્ સ્વરાટ્ ॥ ૮૧॥

સમ્રાડ્વિશ્વેશિ તલ્લિઙ્ગં તદ્દૃશ્યં સૂક્ષ્મદર્શિભિઃ ।
હૃદા પશ્યન્તિ તલ્લિઙ્ગં મનસૈવ મનીષિણઃ ॥ ૮૨॥

શ્રવણાયાપિ તલ્લિઙ્ગં ન લબ્ધં બહુભિરિશ્શિવે ।
શ઼ૃણ્વન્તોઽપિ શિવે લિઙ્ગં ન વિદુર્બહવોઽપિ યે ॥ ૮૩॥

આશ્ચર્યવત્પશ્યતિ કશ્ચિદેતદાશ્ચર્યવચ્છૃણુતે તચ્ચલિઙ્ગમ્ ।
આશ્ચર્યવદ્બોધતે યં તથાન્યે હ્યાશ્ચર્યવત્પશ્યતિ તચ્ચલિઙ્ગમ્ ॥ ૮૪॥

ન પ્રાણેન નાપાનેન લિઙ્ગહીનો ન જીવતિ ॥ ૮૫॥

અજામેકાં લોહિતશુક્લકૃષ્ણાં બહ્વીં પ્રજાં જનયન્તીં સરૂપામ્ ।
અજો લિઙ્ગી જુષમાણોઽનુશેતે જહાત્યેનાં લિઙ્ગસંસ્થસ્સ આત્મા ॥ ૮૬॥

તલ્લિઙ્ગમારે દ્રષ્ટવ્યં શ્રોતવ્યં વેદપર્વતૈઃ ।
પુરીશયં ચ તલ્લિઙ્ગં સર્વભૂતેષુ સંસ્થિતમ્ ॥ ૮૭॥

કોહ્યેવાન્યાચ્ચકઃપ્રાણ્યાલ્લિઙ્ગહીનોમહેશ્વરિ ।
રસોહ્યેષમહાલિઙ્ગરસ એષોઽમ્બિકેસદા ॥ ૮૮॥

એતદ્ધિ પરમાનન્દં લિઙ્ગમેતત્સ્વયં પ્રભમ્ ॥ ૮૯॥

યસ્માત્પરં નાપરમસ્તિ કિઞ્ચિદ્યસ્માન્નાણીયો ન જ્યાયોઽસ્તિ કિશ્ચિત્ ।
વૃક્ષ ઇવ સ્તબ્ધન્દિવિ તિષ્ઠતિ લિઙ્ગમેકં તેનેદં પૂર્ણં લિઙ્ગભાસૈકસર્વમ્ ॥ ૯૦॥

લિઙ્ગાદ્વાચો નિવર્તન્તે હ્યપ્રાપ્ય મનસા સહ ।
તદત્યતિષ્ઠદ્દેવેશિ બ્રહ્માણ્ડોર્ધ્વાઙ્ગુલં તતમ્ ॥ ૯૧॥

તસ્મિન્ભાતિ સ્વયં લિઙ્ગં ચન્દ્રસૂર્યાગ્નયો ન હિ ।
ભાતિ તત્તેજસા વ્યાપ્તં જગદેતચ્ચરાચરમ્ ॥ ૯૨॥

યથા ક્ષેત્રજ્ઞાવિહિતં હિ ભૂમૌ ગુહાહિતં તચ્ચ લિઙ્ગં મહાન્તમ્ ।
હિરણ્યં ન વિન્દન્તિ ચોર્ધ્વં ચરન્તસ્તથેદં પ્રપશ્યામ્બિકે લિઙ્ગમેતત્ ॥ ૯૩॥

જાગ્રત્સ્વપ્નસુષુમીષુ યલ્લિઙ્ગં મનસા તતમ્ ।
તદેતદહમિતિ જ્ઞાત્વા લિઙ્ગી લિઙ્ગાતિગો ભવેત ॥ ૯૪॥

યથોર્ણનાભિસ્સૃજતે તન્તુજાલં ગૃહ્ણાતિ વક્ત્રેણ તથાત્તિ સર્વમ્ ।
તથા જગજ્જાલમિદં હિ લિઙ્ગતો ભવત્યતોઽન્તે વિલયં પ્રયાતિ ॥ ૯૫॥

બ્રહ્મૈવ તલ્લિઙ્ગમિદં સનાતનં સ્વવિદ્યયા સંસરતે ચ મુચ્યતે ।
તદેતલ્લિઙ્ગં તપસા વેદિતવ્યં નાન્યૈર્ધર્મૈસ્તચ્ચ લિઙ્ગં ત્વલિઙ્ગમ્ ॥ ૯૬॥

તદેવ લિઙ્ગં ત્વવિમુક્તે નિવિષ્ટં ભૂતાતિગં વિશ્વનાથાભિધં ચ ।
વારાણસ્યાં ભ્રૂયુગે સન્નિવિષ્ટં યોગૈઃ પશ્યન્તિ તત્ર તે ચોત્ક્રમન્તિ ॥ ૯૭॥

તત્રૈવ તેષાં તારકં ચોપદેશમોઙ્કારાદ્યં પ્રણવં બ્રહ્મમન્ત્રમ્ ।
ન તસ્ય પ્રાણોઽનુત્ક્રમતીવ દેવિ તલ્લિઙ્ગસઙ્ગં ભવતીત્યલિઙ્ગમ્ ॥ ૯૮॥

દહરાદ્વિસ્તરં તચ્ચ સૂર્યમણ્ડલમણ્ડિતમ્ ।
ચન્દ્રકોટિસહસ્રાભં તદૃશ્યં સર્વધા શિવે ॥ ૧૦૪॥

યોગેનાત્માનુસન્ધાનૈર્વીતમોહભયૈસ્સદા ॥ ૧૦૫॥

વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થૈસ્સન્યાસયોગૈર્યતિભિશ્શુદ્ધબુદ્ધૈઃ ।
તેષામેવૈતદ્વિરજં લિઙ્ગધામ પ્રાપ્યપ્રાપ્તેશ્ચાવિદૂરં શિવેઽદ્ય ॥ ૧૦૬॥

નૈષા તર્કેણ મતિરાપનેયા ક્ષુરોપમં લિઙ્ગમેતદ્ધિ સત્યમ્ ।
ઋચો અક્ષરે પરમે તત્પ્રવિષ્ટં સર્ગાદિહીનં મહાલિઙ્ગમેતત્ ॥ ૧૦૭॥

સુરાદ્યૈર્દુરાપં તથાયોગિભિઃ કર્મભિશ્ચાપ્યવશ્યમ્ ।
તલ્લિઙ્ગત્યાગેન સર્વધા વીતમોહો ભવત્યવશ્યં શ્રુતિગુહ્યમેતત્ ॥ ૧૦૮॥

યો નાવિરતો દુશ્ચરતિતાન્નાશાન્તો નાસમાહિતઃ ।
તસ્યૈતદુર્લભં લિઙ્ગમાસક્તસ્યૈવ સર્વગમ્ ॥ ૧૦૯॥

યેષાં ન જિહ્મમનૃતં સદૈવ તેષાં લિઙ્ગં હૃદિ ભાત્યેવ શાન્તમ્ ।
અતો લિઙ્ગં પૂજયેદાત્મકામો ન કામકામી લિઙ્ગપૂજાધિકારી ॥ ૧૧૦॥

એતદર્થં ગૂઢતમં મહેશિ નાન્યે વિન્દન્તિ જ્ઞાનનિષ્ઠા હિ ભૂયઃ ।
ન વા દેશિકો નૈવ શિષ્યઃ કદાચિન્ન પૂજા ન પૂજ્યો ન વા પૂજકત્વમ્ ॥ ૧૧૧॥

સ્વદોષાત્પ્રદોષોઽપિ નાસ્ત્યેવ લિઙ્ગે જગન્નૈવ શેષં વિશેષાદ્ભવાનિ ।
મહાશેષભૂષાવિશેષોઽપિનાત્ર સદોષાકરાપારમૌલિર્ન ચૈવ ॥ ૧૧૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે શિવગૌરીસંવાદે ઉપનિષલ્લિઙ્ગકથનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૫૯ - શિવગૌરીસંવાદે ઉપનિષલ્લિઙ્ગકથનમ્ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 59 - shivagaurIsaMvAde upaniShallingakathanam . vAvRRittashlokAH ..

Notes:
Śiva શિવ reveals to Devī દેવી, the mysteries and subtleties of worship of Śivaliṅga શિવલિઙ્ગ.

Encoded and proofread by Ruma Dewan

---

*Shivagaurisamvade Upanishallingakathanam*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*